श्रीमद्रामभद्रदीक्षितविरचितं

वर्णमालास्तोत्रम् ।

अन्तः समस्तजगतां यदनुप्रविष्ट-
माचक्षते मणिगणेष्विव सूत्रमार्याः ।
तं केलिकल्पितरघूद्वहरूपमाद्यं
पङ्केरुहाक्षमनिशं शरणं प्रपद्ये ॥ १ ॥

आम्नायशैलशिखरैकनिकेतनाय
वाल्मीकिवाग्जलनिधिप्रतिबिम्बिताय ।
कालाम्बुदाय करुणारसमेदुराय
कस्मैचिदस्तु मम कार्मुकिणे प्रणामः ॥ २ ॥

इन्दुं प्रसादमवतसयता त्वदीयं
कोपंकरे हुतवहं वहता हरेण ।
शङ्के जगत्त्रयमनुग्रहनिग्रहाभ्यां
संयोज्यते रघुपते समयान्तरेषु ॥ ३ ॥

ईदृग्विधस्त्वमिति वेद न सोऽपि वेदः
शक्नोति कः स्थितमवेक्षितुमुत्तमाङ्गे ।
श्रोतुं क्षमं न तु दृशेक्षितुमप्यतस्त्वां
सर्वे विदन्तु कथमीश कथं स्तुवन्तु ॥ ४ ॥

---

१. पद्मनयनम् २. वेद . ३ कालमेघाय. ४. शिरसि.

उष्णांशुबिम्बमुदधिसयससरौल्ल-
आवा च तुल्यमजनिष्ट गृहं यथा ते ।
वाल्मीकिवागपि मदुक्तिरपि प्रभुं त्वां
देव प्रशंसति तथा यदि कोऽत्र दोषः ॥ ५ ॥
ऊढः पुरासि विनैतान्वयसंभवेन
देव त्वया किमधुनापि तथा न भाव्यम् ।
पूर्वे जना मम विनेमुरसंशयं त्वां
जानासि राघव तदन्वयसंभवं माम् ॥ ६ ॥
ऋक्षं प्लवंगमपि रक्षसि चेन्महात्म-
न्विप्रेषु किं पुनरथापि न विश्वसामः ।
अत्रापराध्यति किल प्रथमद्वितीयौ
वर्णौ तवौदनतया निगमो विवृण्वन् ॥ ७ ॥
नॄणां न केवलमसि त्रिदिवौकसां च
राजा यमार्कमरुतोऽपि यतस्त्रसन्ति ।
दीनस्य वाङ् मम तथापि न ते नवा स्या-
त्कर्णे रघूद्वह यतः ककुभोऽपि जाताः ॥ ८ ॥
कृष्णामपि व्यसनिनीं भवितव्यतां मे
नाथान्यथाकुरु तव प्रभुतां दिदृक्षोः ।
चक्रे शिलापि तरुणी भवता तदास्ता
मायापि यद्घटयते तव दुर्घटानि ॥ ९ ॥
एकं भवन्तमृषयो विदुरद्वितीयं
जानामि कार्मुकमहं तु तमद्वितीयम् ।
श्रुत्याश्रिता जगति यद्गुणघोषणा सा
दूरीकरोति दुरितानि समाश्रितानाम् ॥ १० ॥
ऐशं शरासमचलोपममिक्षुवल्ली-
भङ्गं बभञ्ज किल यस्तव बाहुदण्डः ।

---

१ गर्वैः. २. गरुडेन. ३. तरुणी अहल्या

तस्य त्वशीतकरवंशवतं शशंस
किं दुष्करं भवति मे विधिपाशभङ्गः ॥ ११ ॥
ओजस्तव प्रहितशेषविषाग्निदण्डैः
स्पष्टं जगद्भिरुपलभ्य भयाकुलानाम् ।
गीतोक्तिभिस्त्वयि निरस्य मनुष्यबुद्धिं
देव स्तुतोऽसि विधिविष्णुवृषध्वजानाम् ॥ १२ ॥
औत्कण्ठ्यमस्ति दशकण्ठरिपो ममैकं
द्रक्ष्यामि तावकपदाम्बुरुहं कदेति ।
अप्येति कर्म निखिलं मम यत्र हृष्टे
लीनाश्च यत्र यतिभिः सह मत्कुलीनाः ॥ १३ ॥
अंभोनिधाववधिमत्यवकीर्य बाणा-
न्किं प्लुव्यवानसि ननु श्वशुरस्तवायम् ।
उष्मापनेतुमथवा यदि बाणकण्डू-
देवायमस्त्यनवधिर्मम दैन्यसिन्धुः ॥ १४ ॥
अश्रान्तमर्हति तुलाममृतांशुबिम्बं
भस्माम्बुजद्युतिमदेन भवन्मुखेन ।
असादभूदनल इत्यकृतोत्तरीश
सत्या कथा भवतु साधुविवेकभाजाम् ॥ १५ ॥
कल्याणमावहतु नः कमलोदरश्री-
रासन्नवानरभटोग्रगृहीतशेषः ।
श्लिष्यन्मुनीन्प्रणतदेवशिरःकिरीट-
दाम्नि स्खलन्दशरथात्मज ! ते कटाक्षः ॥ १६ ॥
खं वायुरग्निरुदकं पृथिवी च शब्दः
स्पर्शश्च रूपरसगन्धमपि त्वमेव ।
....दययार्तबन्धो
धत्से वपुः शरशरासभृदभ्रनीलम् ॥ १७ ॥

गङ्गा पुनाति रघुपुंगव यत्प्रसूता
यद्रेणुना च पुपुवे यमिनः कलत्रम् ।
तस्य त्वदङ्घ्रिकमलस्य निषेवया स्यां
पूतो यथा पुनरघेऽपि तथा प्रसीद ॥ १८ ॥
घण्टाघनं घनितकोटिशरासनं ते
लुण्टाकमस्तु विपदां मम लोकनाथ ।
जिह्वालतां वहति यद्भुजगो रिपूणा-
मुष्णैरसृग्भिरुदरंभरिणा शरेण ॥ १९ ॥
प्राङ्न्यवाडसि परेश तथासि तिर्यङ्
ब्रूमः किमन्यदखिला अपि जन्तवोऽसि ।
एकक्रमेऽपि कति वा भुवि न म्रियन्ते
मन्दस्य राघव सहस्व ममापराधान् ॥ २० ॥
चण्डानिलव्यतिकरक्षुभिताम्बुवाह-
दम्भोलिपातमिव दारुणमन्तकालम् ।
स्मृत्वापि संभविनमुद्विजते न धन्यो
लब्ध्वा शरण्यमनरण्यकुलेश्वर त्वाम् ॥ २१ ॥
छिन्नं निजं कुहनया[1] मृगरूपभाजो
नैर्ऋतंचरस्य[2] न किमाविरकारि रूपम् ।
त्वत्पत्रिणापि रघुवीर ममाध माया-
गूढस्वरूपविवृतौ तव कः प्रयासः ॥ २२ ॥
जन्तोः किल त्वदभिधा मणिकर्णिकायां
कर्णे जपन्हरति कश्चन पञ्चकोशान् ।
इत्यामनन्ति रघुवीर ततो भवन्तं
राजाधिराज इति विश्वसिमः कथं वा ॥ २३ ॥
झङ्कारिभृङ्गकमलोपमितं पदं ते
चारुस्तव प्रणयचारणकिन्नरौघम् ।

१ कपटेन. २. राक्षसस्य मारीचस्य.

जानामि राघव जलाशयवासयोग्यं
स्वैरं वसेत्तदधुनैव जलाशये मे ॥ २४ ॥
ज्ञानेन मुक्तिरिति निश्चितमागमज्ञै-
र्ज्ञानं क मे भवतु दुस्त्यजवासनस्य ।
देवाभयं वितर किं त्वसकृत्प्रपत्त्या
मुह्यन्नपि स्मर पुरैव कृतां प्रतिज्ञाम् ॥ २५ ॥
टङ्कारमीश भवदीयशरासनस्य
ज्यास्फालनेन जनितं निगमं प्रतीमः ।
तेनैव राघव भवानवगम्यमान-
स्त्रास निरस्य सुखमातनुते बुधानाम् ॥ २६ ॥
ठात्कृत्य मण्डलमखण्डि यदुष्णभानो-
र्देव त्वदस्त्रदलितैर्युधि यातुधानैः ।
शङ्के ततस्तव पद विदलय्य वेगा-
त्तैरद्भुतं प्रतिकृतिर्विदधे वयस्य ॥ २७ ॥
डिम्भस्तथास्मि रघुवीर तथा दयस्व
लभ्यं यथा कुशलवत्वमपि क्षितौ मे ।
किंचिन्मनो मयि निधेहि तव क्षतं किं
व्यर्था भवत्वमनस गृणतीः श्रुतिस्त्वाम् ॥ २८ ॥
ढक्कां त्वदीययशसामधुनापि शृण्मः
प्राचेतसस्य फेणितं भरताग्रजन्मन् ।
सत्ये यशस्तव शृणोमि मृकण्डुसूनो-
र्धाताप्यतो जगति कोऽस्तु भवादृशोऽन्यः ॥ २९ ॥
त्राणं समस्तजगतां तव किं न कार्यं
सा किं न तत्र करणं करुणा तवैव
अस्त्यातिकार्यकरणे तव नेति या वा-
ङ्मुख्या न सा रघुपते भवति श्रुतीनाम् ॥ ३० ॥

१. वाल्मीके.. २. सूक्तिम्.

तल्लं पदे[1] पदमसीति च धानि देव
तेषां यदस्म्यभिलषन्नुपलब्धुमर्थान् ।
सेवे पदद्वयमतो मृदुलं तवादौ
यद्दारुणोरपि ततो भवदर्थलाभः ॥ ३१ ॥
प्रोथं यदुद्वहसि भूमिवहैकदंष्ट्रं
विश्वप्रभो विघटिताभ्रघटाः सटा वा ।
रूपं तदुद्भटमपास्य रुचास्य दिप्सा
त्वं शम्बरारिरपि कैतवशम्बरारिः[2] ॥ ३२ ॥
दग्ध्वा निशाचरपुरी प्रथितस्तवैको
भक्तेषु दानवपुरत्रितयं तथान्यः ।
तस्याशरासुरसमस्य गुणैः प्रभो मे
पुर्यष्टकप्रशमनेन लभस्व कीर्तिम् ॥ ३३ ॥
धत्ते शिरासि दश यः सुकरो वधोऽस्य
किं न त्वया निगमगीत सहस्रमूर्ध्ना ।
मोहं ममामितपदं यदि देव हन्याः
कीर्तिस्तदा तव सहस्रपदो बहु स्यात् ॥ ३४ ॥
नम्रस्य मे भव विभो स्वयमेव नाथो
नाथो भव त्वमिति चोदयितुं बिभेमि ।
येन स्वसा दशमुखस्य नियोजयन्ती
नाथो भव त्वमिति नासिकया विहीना ॥ ३५ ॥
पर्याकुलोऽस्य किल पातकमेव कुर्व-
न्दीनं ततः करुणया कुरु मामपापम् ।
कर्तुं रघूद्वह नदीनमपापमुर्व्या
शक्तस्त्वमित्ययमपैति न लोकवादः ॥ ३६ ॥
फल्गूनि यद्यपि फलानि न लीप्सते मे
चेतः प्रभो तदपि नो भजति प्रकृत्या ।

---

१. 'शम्बरारिर्मनसिज.' इत्यमरः. २. शूर्पनखा.

मूर्त्यन्तरं व्रजवधूजनमोहनं ते
जानाति फल्गु न फलं भुवि यत्प्रदातुम् ॥ ३७ ॥
बर्हिःशतग्रथितकेशमनर्घवेष-
मादाय गोपवनिताकुचकुङ्कुमाङ्कम् ।
हीणो न राघव भवान्यदतः प्रतीमः
पत्न्या ह्रिया विरहितोऽसि पुरा श्रियेव ॥ ३८ ॥
भद्राय मेऽस्तु तव राघव बोधमुद्रा
विद्रावयन्त्यखिलमान्तरमन्धकारम् ।
मन्त्रस्य ते परिपुनन्ति जगद्यथा ष-
डष्टाक्षराण्यपि तथेति विवृण्वतीव ॥ ३९ ॥
मन्दं निधेहि हृदि मे भगवन्नटव्यां
पाषाणकण्टकसहिष्णु पदाम्बुजं ते ।
अङ्गुष्ठमात्रमथवात्र निधातुमर्ह-
माक्रान्तदुन्दुभितनूकठिनास्थिकूटम् ॥ ४० ॥
यज्ञेन देव तपसा यदनाशकेन
दानेन च द्विजगणैर्विपदिष्यसे त्वम् ।
भाग्येन मेऽजनिमृषा यदिदं यतस्त्वां
चापग्रहात्परमबुध्यत जामदग्न्यः[1] ॥ ४१ ॥
रम्योज्ज्वलस्तव पुरा रघुवीर देहः
कामप्रदो यदभवत्कमलालयायै[2] ।
चित्रं किमत्र चरणाम्बुजरेणुरेव
कामं ददौ न मुनये किमु गौतमाय ॥ ४२ ॥
लङ्केशवक्षसि निविश्य यथा शरस्ते
मन्दोदरीकुचतटीमणिहारचोरः ।
शुद्धे सतां हृदि गतस्त्वमपि प्रभो मे
चित्ते यथा हर चिरोपनतामविद्याम् ॥ ४३ ॥

१. परशुराम. २. लक्ष्म्यै.

वन्दे तवाङ्घ्रिकमलं श्वशुरं पयोधे-
स्तानं भुवश्च रघुपुंगवरेखया यत् ।
वज्रं विभर्ति जगदार्तिगिरं विभेत्तुं
विद्यां नताय वितरेयमिति ध्वजं च ॥ ४४ ॥
शंभु[1] स्वयं निरदिशद्गिरिकन्यकायै
यन्नाम राम तव नामसहस्रतुल्यम् ।
अर्थं भवन्तमपि तद्धृदेकमेव
चित्रं ददाति गृणते चतुरः किलार्थान् ॥ ४५ ॥
षट् ते विधिप्रभृतिभिः समवेक्षितानि
मन्त्राक्षराणि ऋषिभिर्मनुवंशकेतो ।
एकेन यानि गुणितान्यपि मानसेन
चित्रं नृणां त्रिदशतामुपलम्भयन्ति ॥ ४६ ॥
सर्गस्थितिप्रलयकर्मसु चोदयन्ति
माया गुणत्रयमयी जगतो भवन्तम् ।
ब्रह्मेति विष्णुरिति रुद्र इति वृथा ते
नाम प्रभो दिशति चित्रमजन्मनोऽपि ॥ ४७ ॥
हंसोऽसि मानसचरा महतां यतस्त्वं
संभाव्यते किल ततस्तव पक्षपातः ।
मय्येनमप्ययन चेद्रघुनन्दन स्या-
ज्जिष्णोरपि त्रिभुवने समवर्तता ते ॥ ४८ ॥
लक्ष्मीकृतोऽजनि यथैव जलाशयाना-
मेको रुषा····तथा कृपयापि कार्यः ।
अन्योऽपि कश्चिदिति चेदहमेव वर्ते
तादृग्विधाम्नपनवंशमणे किमन्यैः ॥ ४९ ॥
क्षन्तुं त्वमर्हसि रघूद्वह मेऽपराधा-
न्सर्वे सहाननुवधूरपि ते पुराणी ।

---

१. सत्त्वरजस्तमोगुणा ।

वासालयं च तनुभृत्कमलं मदीयं
कान्ता परापि नहि किं कमलालया ते ॥ ५० ॥
इत्थं ममास्तु वद मर्त्यनिगद्यमान
त्रैण्यन्तमन्त्रमुखरीकृतपादपीठ ।
राजाधिराज कृपया रघुवीर वर्ण-
मालास्तवं त्वमवकर्णयितुं प्रसीद ॥ ५१ ॥

इति श्रीमद्रामभद्रदीक्षितविरचितं वर्णमालास्तोत्रं सपूर्णम् ।